# सङ्कलनात्मकं मूल्याङ्कनम् - II

## संस्कृतम् - सम्प्रेषणात्मकम्

## कक्षा - नवमी

**समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

| | | |
|---|---|---|
| खण्डः (क) अपठित-अवबोधनम् | - | **10 अङ्काः** |
| खण्डः (ख) रचनात्मक-कार्यम् | - | **15 अङ्काः** |
| खण्डः (ग) अनुप्रयुक्त-व्याकरणम् | - | **30 अङ्काः** |
| खण्डः (घ) पठित-अवबोधनम् | - | **35 अङ्काः** |

(ii) सर्वे प्रश्नाः **अनिवार्याः।**

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अवबोधनम् - ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** 10

सर्वे जानन्ति यत् द्विसहस्रैकतमवर्षस्य गणतंत्रदिवसे गुजरातराज्ये विनाशकारिणा भूकंपेन महान् जनसंहारः अभवत्। गुजरातस्य अनेकेषु भागेषु भवनानि पूर्णतः भूमिसात् अभवन् सहस्रशः च जनाः मृत्युं प्राप्तवन्तः। अस्मिन् संकटकाले अनेकाः सामाजिक-संस्थाः विपद्ग्रस्तानां सहायतायै कार्ये रताः आसन्। भारतस्य केन्द्रीयशासनम् अपि पीडितेभ्यः बहुविधां सहायतां अयच्छत्। अस्मिन् कार्ये सैनिकाः अपि संलग्नाः आसन्। ये जनाः पतितानां भवनानाम् अधः जीविताः आसन् तान् ते येन केन प्रकारेण बहिः निष्कास्य चिकित्सालयेषु अनयन्। तत्र च तेषां चिकित्सा अभवत्। न केवलं भारतीयाः सैनिकाः जनता अपि सहायताकार्ये तत्पराः परं वैदेशिकाः अपि धनेन, अन्नेन, वस्त्रैः परिश्रमेण च सहायतां कृत्वा ''वसुधैव कुटुम्बकम्'' इति सूक्तिं सार्थकाम् अकुर्वन्।

**I. एकपदेन उत्तरत।**

(i) कुत्र महान् संहारः अभवत्?

| | | | |
|---|---|---|---|
| | | (ii) काः सहायतायै कार्ये रताः आसन्?<br><br>**II. पूर्णवाक्येन उत्तरत।**<br><br>(i) महान् जनसंहारः कदा अभवत्?<br><br>(ii) केन्द्रीयशासनम् केभ्यः सहायताम् अयच्छत्?<br><br>**III. निर्देशानुसारम् उत्तरत –**<br><br>(i) प्राप्तवन्तः इति क्रियापदस्य कर्तृपदं किम्?<br>(अ) मृत्युं (ब) जनाः<br>(स) च (द) सहस्रशः<br><br>(ii) 'गुजरातस्य अनेकेषु भागेषु ......' अत्र विशेषणपदं किम्?<br>(अ) अनेकेषु (ब) भूमिसात्<br>(स) भागेषु (द) गुजरातस्य<br><br>(iii) 'व्यस्ताः' इत्यर्थे अत्र किं पदं पयुक्तम्?<br>(अ) रताः (ब) कार्ये<br>(स) कृत्वा (द) सार्थकं<br><br>(iv) 'उपरि' इति कस्य पदस्य विलोमपदम्?<br>(अ) अधः (ब) येन<br>(स) केन (द) बहिः<br><br>**IV. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।** | |
| | | **खण्डः 'ख'**<br>**रचनात्मकं-कार्यम् – ( 15 अङ्काः )** | |
| 2 | | स्वसंस्कृताध्यापिकायाः वर्णनं कुर्वता मित्रं प्रति। लिखितं पत्रं पुनः लिखत।<br><br>(i) .................................. | 5 |

तिथिः ..................................

प्रिय सखि योगिते

असीमस्नेहः।

अत्र कुशलं (ii) .................................. । अस्मिन् पत्रे (iii) .................................. स्वकीयायाः संस्कृत अध्यापिकायाः वर्णनं (iv) .................................. । मम संस्कृत अध्यापिकायाः अभिधानम् (v) .................................. इति अस्ति। तस्याः स्वभावः अतीव (vi) ..................................वर्तते। सा स्वविषये अतीव (vii) .................................. अस्ति। सा सदैव सत्यम् वदति, छात्राणाम् (viii) .................................. च करोति। सा छात्रेषु स्निह्यति। सा मम (ix) ...............अध्यापिका अस्ति। अहम् पुनः मिलित्वा विस्तरेण कथयिष्यामि।

सर्वेभ्यः (x) ..................................

तव प्रिया सखी

रमा

**मञ्जूषा :** तत्रास्तु, करोमि, दिल्लीतः, कविता शर्मा, विनम्र, मार्गदर्शन, नमः, प्रिया, कुशला, अहम्

3 मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्च वाक्यानि संस्कृतेन लिखत– 10



**मञ्जूषा**

पुस्तकालये, उपविष्टः, मञ्चे, हस्ते, दृश्यन्ते, वार्तालापं, शिक्षकः, पुस्तकानि, परस्परम्, छात्राः, पठन्ति, पठन्ति, ध्यानेन, कुर्वन्ति।

**अथवा**

**'परोपकारः'** इति विषयम् अधिकृत्य पञ्चवाक्यानि लिखत– 10

**मञ्जूषा**–मानवजीवनस्य, परोपकारः, पुण्याय, सहातया, सतां विभूतय, सज्जनानां शरीरः, चन्दनेन, जगतः सारभूतः, वृक्षाः, गच्छन्ति, फलानि, अपि।

## खण्डः 'ग'

## अनुप्रयुक्त व्याकरणम् - ( 30 अङ्काः )

4 **उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत–** 6

(i) सः ...................... पुत्रः अस्ति।

(अ) राज्ञः (ब) राजा (स) राज्ञे (द) राजानम्

(ii) ...................... परमात्मनः अंशः अस्ति।

(अ) आत्मानम् (ब) आत्मा (स) आत्मना (द) आत्मने

(iii) किम् ...................... नाम राधिका अस्ति?

(अ) भवान् (ब) भवती (स) भवत्याः (द) भवतः

(iv) ...................... छात्रः चित्रं पश्यति।

(अ) गच्छन् (ब) गच्छत् (स) गच्छन्ती (द) गच्छन्तः

(v) एकः ...................... राजसभाम् आगच्छत्।

(अ) विद्वांसः (ब) विद्वान् (स) विदुषः (द) विद्वांसौ

(vi) कंसः मथुरायाः ...................... आसीत्।

| | | | |
|---|---|---|---|
| | | (अ) राजा (ब) राजानम् (स) राज्ञा (द) राज्ञः | |
| 5 | **उचितसंख्यापदं चित्वा रिक्तस्थानानि पूरयत।**<br><br>(i) .................. बालेषु माता स्निहयति। (त्रि)<br>(ii) .................. सूर्यस्य उदयः पूर्वस्यां दिशि भवति। (एक)<br>(iii) मम गृहे .................. बालिकाः सन्ति। (चतुर्)<br>(iv) कालाः .................. भवन्ति। (त्रि)<br>(v) व्याकरणे तस्य .................. मित्राणि सन्ति। (पञ्चन्)<br>(vi) मम मस्तके .................. नेत्रे स्तः। (द्वि) | | 6 |
| 6 | **प्रदत्तविकल्पेभ्यः उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत।**<br><br>(vii) वयं भवन्तम् सेवफलानि ................ ।<br>(अ) याचै (ब) याचामहै<br>(स) याचस्व (द) याचावहै<br>(viii) आवाम् संस्कृतवाचनं ................ ।<br>(अ) कुर्याम् (ब) कुर्याव<br>(स) कुर्याम (द) कुर्यात<br>(ix) अहं सिहं ................ ।<br>(अ) हनाव (ब) हनाम<br>(स) हतम् (द) हनानि<br>(x) ते सदा सुखिनः ................ ।<br>(अ) स्यात (ब) स्युः<br>(स) स्याः (द) स्याम्<br>(xi) त्वं सदैव सुपाचकं अन्नं ................ ।<br>(अ) भक्षयेत् (ब) भक्षयेत<br>(स) भक्षयेः (द) भक्षयेयुः<br>(xii) वयं सततं ................ ।<br>(अ) मोदेय (ब) मोदेवहि<br>(स) मोदेमहि (द) मोदेरन् | | 6 |

| | | |
|---|---|---|
| 7 | **उचित–उपपदविभक्तीनां प्रयोगं रिक्तस्थानेषु कुरुत।**<br><br>(xiii) ................ वामतः सुधा तिष्ठति।<br>(अ) माम्　　(ब) मम<br>(स) मह्यम्　　(द) मया<br>(xiv) उदारजनः ................ विश्वसिति।<br>(अ) दानेन　　(ब) दानात्<br>(स) दाने　　(द) दानस्य<br>(xv) ................ किं यः मातृभूमिं न सेवते।<br>(अ) सैनिके　　(ब) सैनिकात्<br>(स) सैनिकस्य　　(द) सैनिकेन<br>(xvi) ................ परं विश्रामं कुरु।<br>(अ) अध्यापनस्य　　(ब) अध्यापनाय<br>(स) अध्यापनात्　　(द) अध्यापने<br>(xvii)एतानि वस्त्राणि ................ अलम्।<br>(अ) शिशोः　　(ब) शिशवः<br>(स) शिशुः　　(द) शिशवे<br>(xviii) ................ समया गोमती नदी अस्ति।<br>(अ) लखनऊनगरात्　　(ब) लखनऊनगरे<br>(स) लखनऊनगरम्　　(द) लखनऊनगरस्य | 6 |
| 8 | **अधोलिखितेषु वाक्येषु प्रकृतिप्रत्ययौ संयोज्य विभुज्य वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।**<br><br>(xix) अनुजेन प्रतियोगितायां तीव्रं .................... (धाव् + क्त)<br>(अ) धावितः　　(ब) धाविता<br>(स) धावितम्　　(द) धाविताः<br>(xx) .................... कपयः वृक्षम् आरोहन्ति। (कूर्द् + शतृ)<br>(अ) कूर्दन्　　(ब) कूर्दन्तः<br>(स) कूर्दन्तौ　　(द) कूर्दन्तम्<br>(xxi) रमया एतत् कार्यम् **<u>आरब्धम्</u>**। | 6 |

(अ) आ + रभ् + शतृ (ब) आ + रभ् + शानच्

(स) आ + रभ् + क्त (द) आ + रभ् + क्तवतु

(xxii) सैनिका: देशाय किं न ....................। (कृ + क्तवतु)

(अ) कृतवन्तौ (ब) कृतवान्

(स) कृतवनी (द) कृतवन्त:

(xxiii) कार्यं .................... परिश्रमी जन: प्रसीदति। (कृ + शतृ)

(अ) कुर्वत् (ब) कुर्वन्तौ

(स) कुर्वन् (द) कुर्वन्तम्

(xxiv) युष्माभि: वृद्ध: प्रसीदति। (सेव् + शानच्)

(अ) सेवामानम् (ब) सेवमाना

(स) सेवमान: (द) सेवमानेन

**खण्ड : 'घ'**

**पठित-अवबोधनम् – 35 अङ्का:**

9 **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि उत्तर-पुस्तिकायां लिखत।** 5

'मुने ! न भर्तृसेवाया: अपरं कञ्चन धर्मं करोम्यहम्। तत्प्रसादेन एव मे एतादृशं विज्ञानम्। किञ्च इत: धर्मव्याधाख्यं कञ्चन मांसविक्रयिणं गत्वा एतत् पृच्छ। ततस्ते श्रेयो भविष्यति। त्वं च निरहङ्कार: भविष्यसि इति। एवं सर्वविदा पतिव्रतया अभिहित: गृहीतातिथिसत्कार: स: मुनि: तां प्रणम्य तद्गृहाद् निरगच्छत् ।

I. एकपदेन उत्तरत।

(i) मांसविक्रयिण: किम् नाम आसीत् ?

(ii) गृहिण्यां कस्य प्रसादेन एतादृशं विज्ञानम् आसीत् ?

II. पूर्णवाक्येन उत्तरत।

किं गृहीत्वा मुनि: गृहात् निरगच्छत् ?

III. भाषिक कार्यम् –

(i) ''स मुनि: तां प्रणम्य ..........................।'' अत्र 'मुनि:' इति कर्तृपदस्य क्रियापदं किम् ?

(अ) स: (ब) तद्गृहात् (स) आगच्छति (द) निरगच्छत्

| | | | |
|---|---|---|---|
| | (ii) 'सर्वज्ञया' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम् ?<br>(अ) अभिहित: (ब) पतिव्रतया (स) सर्वविदा (द) प्रणम्य | |
| 10 | **अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत।**<br><br>मेघश्यामोऽस्मि नो कृष्णो, महाकायो न पर्वत:।<br><br>बलिष्ठोऽस्मि न भीमोऽस्मि, कोऽस्म्यहं नासिकाकर:।।<br><br>**I. एकपदेन उत्तरत।**<br><br>(i) महाकाय: क: भवति?<br><br>(ii) भीम: कीदृश: भवति?<br><br>**II. पूर्णवाक्येन उत्तरत।**<br><br>गजस्य कर: क: भवति?<br><br>**III. निर्देशानुसारम् उत्तरत –**<br><br>(i) 'श्वेत:' इत्यस्य पदस्य क: विपर्यय: अत्र प्रयुक्त:?<br>(क) महाकाय: (ख) कृष्ण:<br>(ग) भीम: (घ) कर:<br><br>(ii) श्लोके 'अस्मि' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?<br>(क) कर: (ख) गज:<br>(ग) अहम् (घ) भीम: | 5 |
| 11 | **अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत –**<br>**भोज :** साधु कुविन्द! साधु! कीदृशी लालित्यपूर्णा पदयोजना 'कवयामि वयामि यामि' | 5 |

|  |  |  |  |
|---|---|---|---|
|  | – धन्योऽसि त्वम्! अहमपि आत्मानं धन्यं मन्ये, यस्य राज्ये तन्तुवायाः, कुम्भकाराः, अयस्काराः, शिल्पिनः, श्रमिकाः अपि ललितां काव्यरचनां कुर्वन्ति।<br>(तन्तुवायं प्रति) भोः कविवर! गृहाण पुष्कलं स्वर्णमयं पारितोषिकम्। निजम् आवासम् च प्रयाहि। (मन्त्रिणं प्रति) पण्डितः लक्ष्मीधरः मम राजभवने वासयितव्यः, यावद् अपरा व्यवस्था न भवति।<br>**(राजा तन्तुवायाय स्वर्णमुद्राः अर्पयति। तन्तुवायः पारितोषिकं प्राप्य प्रसन्नवदनः राजानम् अभिवाद्य गृहं प्रयाति)।**<br>(1) एकपदेन उत्तरत:–<br>(i) पदयोजना कीदृशी आसीत् ?<br>(ii) राजा तन्तुवायाय किम् अर्पयति ?<br>(2) पूर्णवाक्येन उत्तरत :–<br>राजाभोजः आत्मानं कथं धन्यं मन्यते ?<br>(3) भाषिककार्यम् :–<br>(i) 'गृहाण' इति क्रियापदस्य कर्तृपदं किं भवितुम् अर्हति ?<br>(अ) कविवर (ब) कुविन्दः (स) अहम् (द) त्वम्<br>(ii) 'गच्छ' इत्यर्थे किं पदं प्रयुक्तम् अत्र ?<br>(अ) गृहाण (ब) प्रयाहि (स) यामि (द) प्रयाति |  |
| 12 | **अधोलिखितश्लोकयोः अन्वययोः रिक्तस्थानानि पूरयत –**<br>**( क )** जाह्नवीचन्द्रभागाजलैः पावितम् भानुजानर्मदावीचिभिर्लालितम्।<br>तुङ्गभद्राविपाशादिभिर्भावितम् भूतले भाति मेऽनारतं भारतम्।।<br>**अन्वयः** – जाह्नवीचन्द्रभागाजलैः (i)____ भानुजा-नर्मदा-वीचिभिः (ii)____ तुङ्गभद्रा (iii)____भावितम् (iv) ____ भारतम् (v) ____ अनारतम् भाति।<br>**( ख )** वेदभाभासितं सत्कलालालितं रम्यसंगीतसाहित्यसौहित्यभूः।<br>भारतीवल्लकीझङ्कृतैर्झङ्कृतं भूतले भाति मेऽनारतं भारतम्।।<br>**अन्वयः** – वेदभाभासितं (i)____ लालितम् रम्यसंगीतसाहित्य (ii)____ भारती वल्लकी झङ्कृतैः (iii)____ मे (iv) ____ भूतले (v) ____ भाति।। | 5 |
| 13 | **रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत–**<br>1 <u>मित्रैः</u> सह क्रीडित्वा अष्टावक्रः गृहम् प्रत्यावृत्तः।<br>2 अष्टावक्रस्य पिता <u>शास्त्रार्थाय</u> राजसभां गतः आसीत्।<br>3 अष्टावक्रं दृष्ट्वा <u>पण्डिताः</u> उच्चैः अहसन्।<br>4 <u>राजसभायां</u> मिथ्याज्ञानगर्विताः पण्डिताः आसन्। | 5 |

| | | |
|---|---|---|
| 5 | राज्यं वंशपरम्पराप्राप्तम् अस्ति। | |

**14** **अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत –** 5

(1) प्रसन्नः भोजः तस्मै कुविन्दाय प्रभूतं धनं दत्तवान्।

(2) भोजस्य अभिवादनं कृत्वा लक्ष्मीधरः तस्य राज्ये निवस्तुम् इच्छति।

(3) नगरे निरक्षरः न प्राप्तः अतः नगरपालः काव्यरचनाकौशलहीनं तन्तुवायम् आनयत्।

(4) राजा मन्त्रिणम् आदिशत् यत् सः विद्वान् अशिक्षितगहे वासयितव्यः।

(5) राजा भोजः कलाप्रियः गुणज्ञः विद्वान् च आसीत्।

(6) परं सः तन्तुवायः सुन्दरकाव्यरचनाम् अकरोत्।

(7) लक्ष्मीधरः नाम विद्वान् भोजस्य राजसभाम् आगच्छत्।

(8) नृपः तन्तुवायस्य काव्येन प्रभावितः अभवत्।

(9) लक्ष्मीधरः भोजं प्रशंसन् तस्मै आशीर्वादम् अयच्छत्।

(10) राजा लक्ष्मीधराय आवासस्य व्यवस्थायै नगरपालम् आदिशत्।

**15** **रेखाङ्कितशब्दानाम् अर्थान् विकल्पेभ्यः चित्वा लिखत।** 5

क एतद् अवगत्य प्रेरितः स वेगेन आश्रमम् आगतावन्।

(1) गत्वा (2) प्रत्यागतः (3) ज्ञात्वा

ख जलमूलम् अन्विष्यता तेन कश्चन शब्दः श्रुतः।

(1) विशेषता (2) नक्षत्र विज्ञाने (3) अन्वेषणं कुर्वता

ग प्रतिध्वनिविज्ञानं विना संगीत साधनानां निर्माणं असाध्यं वर्तते।

(1) सहायकः (2) असम्भवं (3) रुग्णं

घ गम्भीराध्ययनं कृत्वा अभूतपूर्वाः सिद्धयः सम्प्राप्ताः।

(1) समापिताः (2) लब्धाः (3) समोपे

ङ सप्तवर्षीयः सन् छात्रः पञ्चविद्याः अधीतवान्।

(1) ध्यानेन (2) अनुसृत्य (3) पठितवान्

-o0o0o0o-